


# 10 अहं स्वदिवसं कथं यापयामि?



मित्राणि! नमस्कारः। अहं पिहुः अस्मि। अहं षड्वर्षीया अस्मि। अद्य अहं स्वदैनन्दिनकार्यक्रमं संविभक्तं करिष्यामि यत् अहं प्रातः आरभ्य रात्रिपर्यन्तं किं किं करोमि इति।


पश्यन्तु, आकाशे सूर्योदयः जातः। प्रभातम् अस्ति।





अहं प्रातः शयनाद् उत्थाय चषकमितम् उष्णजलं पिबामि।


मम दिवसः योगेन व्यायामेन वा आरभते।





ततः, अहं दन्तधावनं कृत्वा स्नानं करोमि।

अहं प्रातराशं कृत्वा विद्यालयाय सज्जा भवामि।






© NCERT not to be republished


अहं विद्यालये सहपाठिभिः सह अध्ययनं करोमि क्रीडामि च।






सूर्यः आकाशे उच्चः अस्ति। अपराह्णसमयः जातः। अहं हस्तौ प्रक्षाल्य मित्रैः सह मध्याह्नभोजनं करोमि।

अहं विद्यालयात् गृहम् आगत्य किञ्चित्कालं विश्रान्तिं करोमि।








पश्यन्तु, सूर्यः अस्तं गच्छति। अयं सायंकालः अस्ति। अहं मित्रैः सह क्रीडामि ततः पठामि।

तत्र पश्यन्तु चन्द्रः नक्षत्राणि च दृश्यन्ते आकाशे। अयं रात्रिसमयः अस्ति ।





अहं स्वपरिवारेण सह रात्रिभोजनं करोमि ।

अहं कथापुस्तकं पठित्वा निद्रामि।



© NCERT not to be republished



## वार्तालापं करवाम

क. भवतां दैनन्दिनं किम् अस्ति ?
ख. भवन्तः कदा दन्तधावनं कुर्वन्ति ?
ग. भवन्तः कदा स्नानं कुर्वन्ति ?



## एहि करवाम

क. प्रातःकाले भवन्तः यान् क्रियाकलापान् कुर्वन्ति तान् ✓ चिह्नितान् कुर्वन्तु।

ख. भवन्तः दिने यान् क्रियाकलापान् कुर्वन्ति या वस्तूनि वा पश्यन्ति तानि ✓ चिह्नितानि कुर्वन्तु।


   


ग. रात्रौ भवन्तः यान् क्रियाकलापान् कुर्वन्ति तान् ✓ चिह्नितान् कुर्वन्तु।


   

© NCERT not to be republished

चित्रं दृष्ट्वा दिवसस्य समयस्य अनुमानं कुर्वन्तु। "तस्मिन् काले भवन्तः किं कुर्वन्ति" इति मित्रैः सह चर्चां कुर्वन्तु।











## एहि करवाम


ये क्रियाकलापाः प्रायः अधिकं समयं स्वीकुर्वन्ति तान् वर्णयन्तु।

क.






ख.





© NCERT not to be republished

## ऋतवः



ग्रीष्मऋतुः



वसन्तऋतुः



वर्षाऋतुः




शिशिरऋतुः

उपरि-प्रदत्तानि चित्राणि पश्यन्तु, ग्रीष्म-शिशिर-वसन्त-वर्षादिषु ऋतुषु विद्यमानभेदानां विषये चर्चां कुर्वन्तु ।

**ऋतुना सह वस्तूनां मेलनं कुर्वन्तु।**

**वर्षाऋतुः**

**ग्रीष्मऋतुः**




**वसन्तऋतुः**

**शिशिरऋतुः**

© NCERT not to be republished



## एहि, भाषणं करवाम

क. ग्रीष्मकाले भवान् किं खादितुम् इच्छति?

ख. भवान् शिशिरे किं धर्तुं इच्छति?




## एहि, करवाम

**ऋतोः नाम लिखित्वा चित्रैः सह मेलनं कुर्वन्तु।**





















© NCERT not to be republished



## परियोजना-कार्यम्

भिन्न-भिन्न-ऋतुषु, तथा तत्तद् ऋतुषु ये उत्सवाः आचर्यन्ते तेषु स्थानीय-उत्सवेषु च बालकानां यानि प्रिय-खाद्य-वस्तूनि सन्ति तानि चित्रयितुं संश्लेषयितुं वा बालकान् वदन्तु।